Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११८ / घ

Title पूर्वत्रासिद्धमिति पाणिनि सूत्रस्य पूर्वपक्षः

Author

Extent ८ पत्र Age

Subject व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वत्रासिद्धमिति
सूत्रस्य पूर्वपक्षः

११८

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ११८६
पूर्वेत्रालि ...
...

श्रीमलेशायन गाः ५५

नं. ५५
नं. ११८

© Dharmartha Trust J&K. Digitized by eGangotri

१ श्रीगणेशाय नमः पूर्वत्रासिद्धमिति सूत्रे भाष्ये यद्विप्रतिषेधे परमित्यस्य त्रिपाद्याम
प्रवृत्तिस्तर्हि द्रोग्धा द्रोग्धुमित्यत्र घत्वस्यासिद्धत्वात् ढत्वं प्राप्नोति· एवं काष्ठतडित्यत्रा
पि संयोगादिलोपस्यासिद्धत्वात्संयोगान्तलोपः प्राप्नोतीत्याशंक्यानवकाशत्वेनैतौ विधी वच
नप्रामाण्यादत्र विषयत इति समाहितं तत्र कैयटे पूर्वत्रासिद्धमित्यस्याधिकारत्वे परस्या
सिद्धत्वात्कथं बाध इति शंकानिरासार्थं वचनप्रामाण्यादधिकाररूपप्रकरणस्यास्याबाध
नादित्युक्तं विवरणे च तथैवानुमोदितं एवं चास्माद्ग्रन्थात्सर्वथा निरवकाशत्वविषये
पूर्वत्रासिद्धमित्यस्याप्रवृत्तिरिति ध्वनितमित्यत आह जश्त्वमिति कृत्वेत्यर्थः यत्तु
जश्त्वमिति प्रतीकमुपादायाऽत्र भाष्याशयमजानता सामान्यतो बाधकविषये पूर्वत्रा १

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धमित्यस्या प्रवृत्तिरिति अपसिद्धान्तमंगीकृत्य बाधितेति शेषः अवसाने चर्त्वस्य परांत
जश्त्वादिति शेषः खर इत्युक्तं तत्कथमिति स एव प्रष्टव्यः नच सत्यपि संवैभे बाधनं भवतीति
तक्रकौण्डिन्यन्यायेन बाध इति वाच्यं सोपि परस्परसिद्धयोरेवेति सिद्धान्तात् । न हि ब्राह्मणे
भ्यो दधि दायतामित्युक्ते परोक्षपुरुषेण शान्तवारं तक्रं कौण्डिन्यायेत्युक्तेपि कौण्डिन्यस्तक्रदानं ल
भ्यते एवं चश्छोटीतिसूत्रे तक्विव इतिप्रतीकमुपादाय यत्तु भाष्यानन्तश्चिव इत्यत्र जश्त्वकृते
खरिवेत्युक्तं तन्न तदेशान्तत्वेन जश्त्वापत्त्या सवैयर्थ्यात् यत्तु तस्योत्रेणाक्तं तदेवावसाने च
र्त्वकृतेन पश्चात् क्विवइत्यनेन संबंधे सत्यां जश्त्वांत इति जश्त्वे खरि चेति चर्त्वमिति तन्न दनितदा
तिस्यवाधः जश्त्वप्रति अवसाने चर्त्वस्यापवादत्वात् जस्त्वशिवशब्दानपेक्षणाच्चेतिय

© Dharmartha Trust J&K. Digitized by eGangotri

२ घ्नोरस्मामायामुक्तं. तस्माद्दसमात्रं उक्तमुक्तेः यत्रोक्तं. तद्दोषांतरत्वेन जश्त्वोपन्यासवैय
2 र्थ्यादिति तदपि न. पूर्वान्यवलक्षणप्रवृत्त्याप्राप्तं केनवार्यतां चर्त्वं नेति चेत् तस्यासिद्
त्वात् प्रयोजनाभावाच्छब्दाधिक्यमिति चेत् विम्बपाद्युदाहरणे दार्धाज्ञसित्वस्यस्यक
उपयोग इति मनसि तल्लिंगं विभावय. यत्रोक्तं जस्त्वाशिवशब्दानपेक्षणादिति तदपि न.
अन्वययोजनायाः संभवात् भाविन्यवसाने भगे वावसान इत्यस्य पूर्वमप्रवृत्तेश्चेति
दूषणमपि परिभाषयोऽभावादेवगतमायं तत्रत्यचर्त्वस्यासिद्धत्वादिति मतीकमुपा
दाय तत्रकौंडिन्यन्यायेन बाध्यबाधकभावव्यवस्था रतसमाहितः सापि तथैवोक्तमुक्तेः
यत्रोपष्टंभकमुक्तं अजादेर्द्वित्वमापस्येति सूत्रे तत्र कौण्डिन्यन्यायउक्त इति तत्रात्रच २

महदेववैलक्षण्यमितिन तत्साम्यं· तस्य च परस्य रसिद्धविषयत्वात्· एतस्य चासिद्धासि
द्धविषयत्वात्। अतएवलिड्लिटेरित्युदाहरणेजश्त्वचर्त्वेइतिद्वंद्वस्योपादानंसार्थकं
॥अन्यथाऽत्रैवतत्रापिजश्त्वंचर्त्वेजश्त्वचर्त्वेइतिवावदेत् बाधितापन्ते इत्यध्याहारेण
लापयितुंशक्यत्वात्· किंच· षट्षड़ित्यत्र आंतरतम्यात्षकारस्यचर्त्वेनषकारएव
प्राप्नोतिनटकारः। अल्पप्राणतयाप्रयत्नभेदात्· अतोचर्त्वस्यासिद्धत्वाज्जश्त्वेनडुका
रेपश्चात्पाक्षिकेटकाररूपद्वयमित्यवश्यंवाच्यं· तन्मतेनुरूपद्वयासिद्धिः स्पष्टैवःप
ष्टेवः यदितुषकारस्यानिकचर्त्वोऽप्रवृत्तौतदाजश्त्वेनडुकारेतस्यपाक्षिकेचर्त्वेरूपद्वयमि
तिचेद्दूषेणतदारूपद्वयसिद्धावपिषष्ट्इतितृतीयमपिरूपमापद्येत· तत्रकेचित्प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

३ येन वर्त्मप्रवृत्तेन तत्र जश्त्वाप्रवृत्तेः। किंच नलोपः प्रातिपदिकेति सूत्रस्य भाष्यविरोधो
3 पि तत्राह अहोभ्यां अहोभिरित्यत्र रुत्वस्यासिद्धत्वात्पूर्वं नलोपे पश्चाद्दकारस्य रुत्वे
रूपसिद्धिरित्याशंक्य वार्तिककृता अह्नो नलोपस्य प्रतिषेधो वक्तव्य इति चोदिते सर्वथा
निरवकाशस्य लोपबाधविषये पूर्वत्रासिद्धमित्यस्य बाध इत्यभिप्रायेण। नवकाशो हि न
लोपं बाधिष्यत इति एकदेशिनोक्ते सर्वथा निरवकाशविषय एव पूर्वत्रासिद्धमित्यस्य बाधीता
न्यत्रेत्यभिप्रायेण सावकाशो रुः कोवकाशः। अनंत्यः कुत्र अकार इत्युक्तं त्वद्रीस्यासत्यपि
संभवे बाधनं भवतीत्येतद्विषयेपि पूर्वत्रासिद्धमित्यस्य बाधेऽनेनैवोपपत्तौ एवं तर्हि
आचार्यप्रवृत्तिर्ज्ञापयति नान्तंत्यस्य रुर्भवतीति यदयं अहन्ग्रहणं करोतीत्यादिभाष्य ३

© Dharmartha Trust J&K. Digitized by eGangotri

स्यासंगत्यापत्तेः। मन्मते तु एतद्विषये पूर्वत्रासिद्धमित्यस्य बाधे बीजाभावेन एवं तर्हि
स्यादिभाव्यं समभ्येव· न च संबुद्धौ चारितार्थ्यात् नास्ति येन नाप्राप्तिविषयत्वेनि बाध्यं· न
चापि नलोपप्राप्तेः सत्वात् निषेधेनापि बाध इत्यन्यत्· तर्हि येन नाप्राप्तिन्यायेन बाध
काबाधितत्वमिति विशेषोऽस्ति। येन न्यायाविषयत्वात् अत एव ब्राह्मणेभ्यो दधि
दीयतां न राज्ञो तद्दीयतां कौण्डिन्यायेतु तत्कमपि न्यायादावपि सर्वेत्र कौण्डिन्याय तक्रदानमेव भ
वति न द्वन्द्व तद्धि इह नेति नांतानुकरणस्य संबुद्धौ चारितार्थ्यमाशंक्यैवं तर्हि रूपरात्री
तिथ्यर्थमिति ज्ञापकमाश्रित्य नमिस्यन्यदेतत् न चैवमपि ईष गणो इति वत् अत्रापि अहन्
शब्दां तस्य नस्य रुरित्यर्थे नलोपप्रसक्तेः प्राप्त्या सर्वथानि रवकाशत्वं दुर्वारमेवेति बाध्यं सं

© Dharmartha Trust J&K. Digitized by eGangotri

४ बुद्धौ चारितार्थ्यसंभवात् । यद्येवं नास्ति येन नाप्राप्ति विषय इति वाच्यं एतेन सर्वथा निर
वकाशत्वापगमे ऽपि येन नाप्राप्तिन्यायविषयत्वात् । एतेन शेखरे वस्तुतः सत्यपि संभवे बा
धनं भवतीति भाष्यसिद्धान्तानुकूलत्वेन लोपापवादत्वमेव । निषेधविषये ऽपि प्राप्तिमात्रेणेये
न नाप्राप्तिन्यायसत्वात् । निषेधेनापि तदभाव इत्यन्यत् एतेन संबुद्धौ चारितार्थ्यमित्यपा
स्तमित्युक्तिरेवापास्ता । नलोपः प्रातिपदिकेति सूत्रविवरणमपि तथैव । किं च नाह्वस्येति
सूत्रस्य वार्त्तिकविरोधोपि । तत्र हि ईयिनः । दण्डिन ई हन्तव्यः । दण्डी तर ईत्युदाहरणं तत्र र
थिनूशब्दात्तरपि नाद्ध्वस्येति नुट्प्राप्नोति ईत्वं नलोपश्चेति तत्र नलोपापवादत्वानुपदं नुडपवादके
ईकारः । तत्र नुट्लोपयोः कृतयोरपि ईकारस्य ईकारादेशरूपसिद्धिर्मन्यते । नचैवं कृतेनु ४

© Dharmartha Trust J&K. Digitized by eGangotri

ईटि चारितार्थ्ये ईकारस्येति नुडागमस्यापि बाधो न स्यादिति वाच्यं उभयोरेकदेशस्थत्वेन
पूर्वपर इति विषयविभागाभावात्। लब्धा सानुतक्रकौण्डिन्यन्यायेन पूर्वं नकारस्य ईकारे तस्या
सिद्धत्वात् सवर्णदीर्घाभावे स्थानासिद्धिः स्यादेव। नहि न्यायः फलादिवत् विषयस्तस्यापरि
हारः कर्तुं शक्यः एतेन तत्र ईदुपि न इति प्रतीकमुपादाय नुडुपधादीकारो विधीयते स च न
लोपे ईकारस्य विधेयः यदि तु लोपापवादेन कारस्य स्थाने विधीयेत तदा तस्यासिद्धत्वात् एकादे
शाभावाद्रूपं न सिध्येदिति कैयटोऽप्यपास्तः। नन्वेवं तर्हि नोनुडिति सत्रस्य भाष्यविरोधः। नोर्हि
नुटः परत्वेऽसत्त्वान्नित्यत्वमनुभक्तत्वात्तद्ग्रहणेन ग्रहणान्नकारस्य बलप्रसंग इत्याशंक्य
निर्दिश्यमानपरिभाषयाऽसिद्धत्वाद्वा समाहितं तत्राप्यसिशब्दान्यनुपिवत्वप्राप्तौ नित्यनुट् च तत्र बलो

© Dharmartha Trust J&K. Digitized by eGangotri

५ तरमपि नुड्भ्यामित्याद्यो त्वड्गीत्यापूर्वत्रासिद्धमित्यस्य प्रवृत्तौ नुडोऽसिद्धत्वात्पूर्ववत्त्वे ततो नु
5 ट्त्वस्य लक्ष्यस्येति पुनर्वत्वाभावात् शंकासमाधानेनि र्दत्वे स्यातामिति चेन्न. तत्र हि नुड्
वत्त्वं नलोपश्चेति त्रितयप्राप्तौ वत्त्वस्यासिद्धत्वान्नलोपे तत्रापि त्रिपाद्यपवादत्वात्सर्वथा निरव
काशत्वान्नुटि ततो नलोपः ततो जायमानं वत्त्वं नकारस्यात् इति शंका असिद्धत्वान्नेति समाधान
मित्यदोषात्। एवं च नत्र स्याऽक्ष्णवानिति प्रतीकमुपादायाऽक्षिशब्दस्य मतुनित्वं दस्यापि हृस्य
तदन्तत्वादणनुकोऽसिद्धत्वात्पूर्वं नलोपाभावात्पूर्वंगत्वानुगिति वदन्कैयटस्त्वसंगत एव. तदनु
पादिविवरणमपि तथैव। किंच नाड्स्यादिति सूत्रस्य वार्त्तिकांतरविरोधोऽपि. तत्र हि भूरिदान्नस्तुड्
वक्तव्यः। भूरिदावत्तरो जन इत्युदाहरणं। तत्र भूरिदावन्शब्दात्तरपि नुड् नलोपतुडां प्रसक्तौ ५

© Dharmartha Trust J&K. Digitized by eGangotri

नलोपापवादकत्वान्नानुड्यत्वपवादकस्तुडिति तु न तु उपगमेन लोपे प्रसक्ते कृते तेन लोपे तु तुगागम
स्य चारितार्थ्यात् त्वं च्वा सिद्धमित्यस्य बाधबीजाभावेन तुडागमस्यासिद्धत्वात् पूर्वं नलोपे ततो
तुक्त्वपसिद्धिस्यैव लम्मेते नञ्कौ डित्य
त्यापविषयत्वानलोपापवादके तुग्धकृते ततो नलोपो नैव स्याद्रूपासिद्धिस्यैवेति अलं भाष्य
विरुद्धकल्पनया न च वाकृ वाकृ इत्युदाहरणे परभाष्यविरोधः। तत्र हि वाकृस् अस्या पवस्या पांसु
लोपे वोः कुरिति कुत्वेन ककारे जश्त्वं बाधित्वा वावसाने इति ककारे तस्याद्वित्वे चर्त्वस्यासिद्धत्वेऽपि
स्थानिवत्त्व ककारस्य प्रसंगे न भावात्तावेव जश्त्वाप्राप्त्या रूपसिद्धिर्मन्यते। लङ्घ्याच्चर्त्वस्यासिद्ध
त्वात् ककारे परे पूर्वस्य यत्नधायापूर्वं चर्त्वेन ककारे तस्याद्वित्वे वावसाने चर्त्वस्याज्झश्त्वेन गकारे वा

© Dharmartha Trust J&K. Digitized by eGangotri

६ सानइत्यस्यासिद्धत्वात्तवर्परत्वाभावेनरवरिचेत्यस्याप्राप्त्यागश्नवणंदुर्वारमेवेतिवाच्यं·नमुने

इतिवत्पूर्वत्रासिद्धीयमित्यस्यत्वेपितत्कृतेप्यत्वासत्वाद्वित्वाश्रयस्यकार्यकर्तव्येऽसिद्धत्वंनस्याद्

र्थेइतिस्वदोषात्॥तचनत्वाश्रयाश्रयत्वेनलक्ष्यानुरोधान्नमुनेइत्यत्राश्रयत्वेपिप्रकृतेतथाश्रयणे

प्रतिपत्तिगौरवमितिवाच्यं·अण्धातोःक्विपिपूर्वत्रासिद्धीयमद्वित्वेइतिपूर्वंचर्त्वेनककारेतस्या

नचिचेतिद्वित्वेऽवसानेचचर्त्वस्यासिद्धत्वाद्ककारेसतिपरेपूर्वत्रगश्नवणंदुर्वारमितितदुद्धारणार्थंतत्रा

द्याश्रयणस्यावश्यकत्वात्नतएवानवबोधात्।किंचहल्त्वंनप्रकरणस्यशेखरविरुद्धंच· तथाहिचैवंद्वि

त्वंप्रयुक्तं।वाक्वाक्इतिभाष्योदाहरणसिद्धयेवर्णेद्वित्वेपिनतस्यवृत्तेरावश्यकत्वा[illegible]प्रत्यपायाच्च ६

३ +तुर्णामित्यत्रणत्वंद्वित्वमितिमूलस्यप्रतीकमुपादायननुपूर्वत्रासिद्धमद्विवचनेइतिणत्वात्पूर्वमेव+२

© Dharmartha Trust J&K. Digitized by eGangotri

र्त्वस्यासिद्धत्वाज्झस्यैव द्वित्वे अंत्यस्य चर्त्वे पूर्वत्र गश्रवणापत्तिः। अवसाने चर्त्वस्यासिद्धत्वा
त्वपरत्वाभावेन तस्य चर्त्वसंभावनापि न। न च कस्य द्वित्वेपि अवसाने चर्त्वस्यासिद्धत्वाज्झ
कारे ऽश्रिशि परे पूर्वस्य जश्त्वे उत्तरीत्यैव चर्त्वाभावे गश्रवणं दुर्वारमिति वाच्यं। न मुने इति
वत्पूर्वत्रासिद्धीयमित्यस्य द्वित्वे कृतेपि सप्रत्यासत्त्या द्वित्वाश्रयस्य कार्यैकर्तव्ये ऽसिद्धत्वं नेत्य
प्यर्थे इति न दोषः। एतेन द्वित्वे परसवर्णत्वं सिद्धं वक्तव्यं संपद्यते त्वत्र त्रियकारार्थमिति वचनसाम
र्थ्येव र्णद्वित्वे तदप्रवृत्तिरित्यपास्तमित्युक्तं। तत्रत्वद्वीत्यावावृ इत्यस्यामवस्थायां चोः कुरिति
कुत्वेन ककारे तत्र चर्त्वस्यासिद्धत्वात्पूर्वं द्वित्वेपि न कश्चिद्दोषविशेष इति पूर्वत्र गश्रवणाप
त्तिरिति दूषणं परिभाषाप्रवृत्त्या वारणमित्युभयमपि असंगतमेव। एवं कस्य द्वित्वे ऽवसा

© Dharmartha Trust J&K. Digitized by eGangotri

७ नेचर्त्वस्यासिद्धत्वेपिककारस्यैवस्थानित्वात्तस्यचग्रहणानंतरभावाज्जत्वप्राप्तिरेवनास्तीत्यवसाने
7 चर्त्वस्यासिद्धत्वानुस्वारपादनपराशंकानवपुनइत्यादिविवादित्यादिनासमाधानमेतदुभयमपिनि
र्युक्तिकमेवेति विरोधःस्पष्टएव। नचमूलानुरोधेनेदंसर्वं। अतएवलिड्लिडित्युदाहरणेम
ले जश्त्वचर्त्वे इति द्वंद्वनिर्देशः सार्थक इति वाच्यं। रामात् रामादित्युदाहरणेजश्त्वं बाधित्वाच
र्त्वमिति शास्त्रप्रत्ययेननायं मूलाशय इति लयैवबोधनात्। नहिमूलाशयस्य तथात्वेऽभुद्धंप
ठित्वाकुचोद्यंकर्तुमुचितं। किंचमनोरमायां तच्छिवइत्युदाहरणेप्राचीनोक्तदूषणावसरेनैरव
कंठरवेणोक्तमिति पूर्वमेवोक्तं नविस्मर्तव्यं दूषितमित्यन्यदेतत्। नचैवं नरत्वचर्त्वे इति द्वंद्वनि
र्देशोऽसंगत इति वाच्यं। बाधेदृष्टेऽन्यसाम्यादिति न्यायेन तस्याप्यसंगतत्वेइष्टापत्तेः ए ७

कंशा पूर्वाः खय इति सूत्रे उच्छिषतीत्यत्रान्तरंगत्वात् किं चर्त्वस्यासिद्धत्वात्सवर्णे द्वित्वेह
लादिः शेषेण तकारस्य शेषप्राप्ते छकारशेषार्थं वार्तिककृता शर्पूर्वे शेषे खर्पूर्वे ग्रह
णं कर्तव्यमिति वार्तिके प्रणीते तत्र उच्छिषतीति प्रतीकमुपादाय केयटेन ननु चपूर्व
त्रासिद्धीयमद्विर्वचने इति चुत्वे कृते छिशादस्य द्विर्वचने चकारशेषे लोके रूपं सिध्यतीति
नार्थः वार्त्तिकेनेति चोदिते उभौ साभ्यासस्येति लिंगात् अस्माद्वार्त्तिकाद्वा परिभाषा नित्येत्युक्तं
तत्रस्य चातुर्थप्रस्थापनार्थे निवर्तने द्विर्वचने इत्यस्य च द्वित्वे कर्तव्ये कृते नेत्यर्थः अत एव वा
क् वाक्क इति भाष्योदाहृतं संगच्छते अन्यथा चत्वेस्यासिद्धत्वात्कस्यैव द्वित्वं त्यस्यावसान इति च
र्त्वे गस्यैव श्रवणं स्यात् किंच कृतेपि कस्य द्वित्वे चर्त्वस्यासिद्धत्वात्ककारे झशि पूर्वस्य जश्त्वे उकारी

© Dharmartha Trust J&K. Digitized by eGangotri

८ स्येव चर्त्वाभावेगस्यश्रवणास्यादित्युक्तं तदप्यपास्तं उक्तयुक्तेः। किंच लक्ष्मीस्यापि रामादित्युदाहर
णे बाधित्वेति शेषः। अवसाने चर्त्वस्य पदांतत्वस्थलापवादत्वादिति व्याख्यानं तु निष्फलमेव। अ
श्लेच चर्त्वमित्यस्य त्वयमाशयः पूर्वं वावसान इति चर्त्वेपि तदभावे जश्त्वस्य दुर्वारत्वेन तस्मि
न्पक्षेवावसान इति चर्त्वस्यापि प्रवृत्त्या रूपद्वयस्य सिद्धत्वात्। न च चर्त्वाभावपक्षस्योपक्रां
तत्वेन तत्र चर्त्वोपन्यासो न युक्त इति वाच्यं। तकारे चर्त्वाभावपक्षेपि दकारे तत्पक्षेपि दकारे
तत्पक्षस्य वक्तुं शक्यत्वात्। न चैवं व्याख्यानं क्लिष्टं निष्प्रयोजनकं चेति नाभिप्रेतमिति वाच्यं। स्व
सिद्धांत एवं शत्वाभावपक्ष इत्युदाहरणद्वयं निर्बाधमिति सूचितमित्यदोषात्। इदानीं षष्
इति तृतीयरूपमप्युपपद्येतेत्याशंक्य दूषितमित्यन्यदेतत्। न च परं परस्यानथैवापातमिति न ८

© Dharmartha Trust J&K. Digitized by eGangotri

१ विचारितमिति वाच्यं· हल्संधौ वस्तुतस्तु रामादित्यत्रावसान इति चत्वेस्यासिद्धत्वात्
वंजश्लोपन्यास एव युक्त इति लघुरुद्धनेरहक्कद्दरत्नकं ठरवेणोक्तत्वात् ॥ ॥ ॥

9

१

© Dharmartha Trust J&K. Digitized by eGangotri

रतनकंठ

१५४

© Dharmartha Trust J&K. Digitized by eGangotri